International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(1): 130-131
© 2026 IJMH
www.themultijournal.com
Received: 09-02-2026
Accepted: 23-02-2026
Publish : 24-02-2026

**श्रीमती मञ्जुलतासाहुः**
शोधच्छात्रा, अद्वैतवेदान्तविभागः,
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
पुरी

**Correspondence:**
**श्रीमती मञ्जुलतासाहुः**
शोधच्छात्रा, अद्वैतवेदान्तविभागः,
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
पुरी

# लिङ्गभङ्गमुक्तिशतके महावाक्यार्थविमर्शः

**श्रीमती मञ्जुलतासाहुः**

**प्रस्तावना -**

वेदान्तदर्शनस्य मूलाधारभूतानि ग्रन्थत्रयं **उपनिषद्–गीता–ब्रह्मसूत्राणि सभाष्याणि** इति *प्रस्थानत्रयम्* इत्युच्यते। एतेषु ग्रन्थेषु परब्रह्मणः स्वरूपं, जीवब्रह्मणोः सम्बन्धः, मोक्षोपायश्च अत्यन्तं गाम्भीर्येण प्रतिपादिताः सन्ति। अद्वैतवेदान्तपरम्परायां प्रस्थानत्रयस्य अध्ययनं परमावश्यकं मन्यते, किन्तु सर्वे जनाः तेषां गूढार्थं अवगन्तुं समर्थाः न भवन्ति। कालपरिवर्तनेन मनुष्याणां अध्ययनशीलता, धारणाशक्ति तथा गूढतत्त्वग्राहकबुद्धिश्च क्षीयते इति विचार्य, परमकारुणिकैः मुनिभिः वेदान्ततत्त्वावबोधनार्थं प्रकरणग्रन्थाः, स्तोत्रग्रन्थाः, शतकग्रन्थाश्च विरचिताः।

एतेषु ग्रन्थेषु **लिङ्गभङ्गमुक्तिशतकम्** नाम ग्रन्थः उपनिषद्ब्रह्मेन्द्रयोगिभिः विरचितः विशेषमहत्त्वं वहति। अस्मिन् शतके अभिनवशैल्या औपनिषदमद्वैततत्त्वं सुबोधतया प्रतिपादितम् अस्ति। अत्र महावाक्यार्थस्य विवेचनं विशेषरूपेण दृश्यते। अस्य शोधपत्रस्य मुख्यविषयः “लिङ्गभङ्गमुक्तिशतके महावाक्यार्थविमर्शः” इति।

**शतककर्तुः परिचयः -**

लिङ्गभङ्गमुक्तिशतकस्य कर्ता **उपनिषद्ब्रह्मेन्द्रयोगी** इति प्रसिद्धः महान् संन्यासी तथा वेदान्तविद्वान् आसीत्। एते अष्टादशशताब्द्यां दक्षिणभारते विख्याताः आसन्। संन्यासाश्रमं स्वीकृत्य वेदान्त-तत्त्वप्रचाराय जीवनं समर्पितवन्तः।

एतेन मुनिना बहुषु उपनिषद्सु टीकाः विरचिताः। विशेषतः *मुक्तिकोपनिषदि* उल्लिखितानाम् अष्टोत्तरशतोपनिषदां विवेचनकार्ये एतेषां विशेषयोगदानम् अस्ति। तदानीन्तनकाले दक्षिणभारते संगीतपरम्परायामपि महत् सांस्कृतिकवातावरणम् आसीत्, यत्र कर्नाटकसंगीतस्य त्रिमूर्तयः – **त्यागराजः, मुत्तुस्वामीदीक्षितः, श्यामशास्त्री** – प्रसिद्धाः आसन्। तेषां समकालिकत्वेन उपनिषद्ब्र-ह्मेन्द्रयोगिनः ऐतिहासिकमहत्त्वं स्पष्टं भवति।

उपनिषद्ब्रह्मेन्द्रयोगिनः जीवनं वैराग्यप्रधानम् आसीत्। ब्रह्मविद्यायाः प्रचारः, साधनमार्गस्य निर्देशनम्, अद्वैतसिद्धान्तस्य प्रसारणञ्च तेषां जीवनस्य प्रमुखलक्षणम् आसीत्। तेषां रचनासु वेदान्तस्य गाम्भीर्यं तथा भक्तेः माधुर्यं समन्वितरूपेण दृश्यते।

**लिङ्गभङ्गमुक्तिशतकस्वरूपम् -**

**लिङ्गभङ्गमुक्तिशतकम्** उपनिषद्ब्रह्मेन्द्रयोगिभिः विरचितं वेदान्तप्रधानं शतकग्रन्थम् अस्ति। अस्मिन् ग्रन्थे चतुरधिकं शतं (१०४) श्लोकाः सन्ति। शतकस्य नाम ‘लिङ्गभङ्गमुक्तिशतकम्’ इति तत्त्वदर्शिनां दृष्ट्या अत्यन्तं सार्थकम् अस्ति। अत्र ‘लिङ्ग’ इति शब्देन जीवस्य उपाधिरूपं सूक्ष्मशरीरं वा अविद्याकल्पितं भेदबुद्धिरूपं चिन्हं बोध्यते। तस्य ‘भङ्गः’ अर्थात् नाशः एव मोक्षः इति प्रतिपाद्यते।

शतकेऽस्मिन् प्रायः सर्वेषु श्लोकेषु औपनिषदिकमद्वैततत्त्वं निबद्धं दृश्यते। जीवब्रह्मणोः अभेदः, अविद्यायाः स्वरूपम्, ज्ञानस्य महत्त्वम्, मुक्तेः स्वरूपं च अत्यन्तं सरलेन किन्तु गाम्भीर्ययुक्तेन भाषया निरूपितम्। शतकस्यास्य प्रत्येकं श्लोकः अद्वैततत्त्वसंग्रथितः। विशेषतया अस्मिन् शतके

महावाक्यार्थप्रतिपादनम् अत्यन्तं प्रमुखं विषयम् अस्ति। वेदान्तदर्शने महावाक्यानि परमप्रमाणरूपेण स्वीक्रियन्ते। तानि जीवस्य ब्रह्मणि ऐक्यं प्रतिपादयन्ति। अद्वैतवेदान्ते तावत् जीवब्रह्मणोः ऐक्य-प्रतिपादकं वाक्यं महावाक्यम्। तानि चत्वारि महावाक्यानि यथा - ऋग्वेदान्तर्गतायाः ऐतरेयोपनिषदः **प्रज्ञानं ब्रह्म**, यजुर्वेदान्तर्गतायाः बृहदारण्यकोपनिषदः **अहं ब्रह्मास्मि**, सामवेदान्तर्गतायाः छान्दोग्योपनिषदः **तत्त्वमसि**, अथर्ववेदान्तर्गतायाः मुण्डकोपनिषदः **अयमात्मा ब्रह्म** इति। एतानि चत्वार्यपि महावाक्यानि विभक्तिगतसामानाधिकरण्येन तथा लक्षणया च जीवब्रह्मणोः ऐक्यं प्रतिपादयन्ति। तेषु तत्त्वमसिमहावाक्यार्थः अत्र प्रतिपादितोऽस्ति।

**तत्त्वमसि-महावाक्यार्थविमर्शः -**

सामवेदान्तर्गतायां छान्दोग्योपनिषदि **तत्त्वमसि** इति महावाक्यं वर्तते। तत्, त्वम्, असि इति पदत्रयमस्त्यस्मिन् महावाक्ये। त्वं तत् असि इत्यस्यान्वयः। अत्र त्वमिति पदार्थमुद्दिश्य तत्पदार्थः विधीयते। असि इति क्रियापदेन उभयोः ऐक्यं विधीयते। अत्र त्वम्पदेन अल्पज्ञत्वादिधर्मविशिष्टं चैतन्यं बोध्यते। तत्पदेन सर्वज्ञत्वादि-धर्मविशिष्टं चैतन्यं बोध्यते। असि इति क्रियापदेन उभयोः ऐक्यं विधीयते। तथा च अल्पज्ञत्वादिधर्मविशिष्टं चैतन्यं, सर्वज्ञत्वादिधर्मविशिष्टं चैतन्यमस्ति इत्यर्थः अवगम्यते। अयमर्थः परस्परं बाधते। अतः अत्र भागत्यागलक्षणया जीवब्रह्मणोः ऐक्यं बोध्यते। तथैव शतकेऽस्मिन् ऊनविंशतितमे (१९) श्लोके तत्त्वमसि-महावाक्यार्थः प्रतिपादितः –

**सर्वज्ञादिगुणान्वितः परशिवः किञ्चिज्ज्ञ एवावरो**
**ज्ञाज्ञत्वे प्रविहाय जीवपरयोर्लक्ष्यैकतां वेदतः।**
**ज्ञात्वा तत्त्वमसीति याति यतिराड् ब्रह्माहमस्मीति यं**
**दद्याज्जीवपरैक्यसौख्यविभवां मुक्तिं स रामोऽद्य मे।।**

अत्र महावाक्यार्थः अत्यन्तं स्पष्टतया प्रतिपादितः दृश्यते। **तत्पदार्थः-** "सर्वज्ञादिगुणान्वितः परशिवः" इति पदेन *तत्पदार्थः* निर्दिष्टः। अत्र 'तत्' इति शब्दः परब्रह्मणि वर्तते। परशिवः सर्वज्ञः, सर्वशक्तिमान्, सर्वव्यापकश्च इति लक्षणैः युक्तः। स उपाधिशून्यं निरुपाधिकं ब्रह्म। **त्वंपदार्थः -**"किञ्चिज्ज्ञ एव अवरः" इति पदेन त्वंपदार्थः निर्दिष्टः। अत्र जीवः अल्पज्ञः, सीमितशक्तियुक्तः, देहाद्युपाधिबद्धः च इति दर्श्यते। **ऐक्यप्रतिपादनम् -** "ज्ञाज्ञत्वे प्रविहाय जीवपरयोर्लक्ष्यैकतां वेदतः" इत्यनेन जीवब्रह्मणोः ऐक्यं प्रतिपादितम्। अत्र 'ज्ञ' तथा 'अज्ञ' इति विशेषणद्वयं उपाधिसम्बद्धम् अस्ति। उपाधिनिरासेन जीवब्रह्मणोः अभेदः अवशिष्यते। अयं प्रकारः भागत्यागलक्षणा इति वेदान्ते प्रसिद्धः। तत्र उपाधिसम्बद्धधर्माणां त्यागः क्रियते, शुद्धचैतन्यस्वरूपस्य ग्रहणं क्रियते।

**ज्ञानस्य फलम् -**

"ज्ञात्वा तत्त्वमसीति याति यतिराड् ब्रह्माहमस्मीति" इति वाक्येन ज्ञानफलम् निर्दिष्टम्। यतिः तत्त्वमसि-महावाक्यार्थज्ञानात् "अहं ब्रह्मास्मि" इति साक्षात्कारं प्राप्नोति। एवं ज्ञानोत्पत्त्या जीवस्य बन्धः निवर्तते। अविद्यानाशात् मुक्तिः स्वत एव सिद्धा भवति। "जीवपरैक्यसौख्यविभवां मुक्तिम्" इत्यनेन मुक्तेः स्वरूपम् निर्दिष्टम्। मुक्तिः न कश्चित् नवीनः पदार्थः, किन्तु स्वस्वरूपस्य अनुभूतिरेव। लिङ्गभङ्गमुक्तिशते मुक्तिः 'लिङ्गभङ्गः' इति उच्यते। जीवस्य सूक्ष्मशरीरात्मकं लिङ्गं यदा ज्ञानाग्निना नश्यति, तदा जीवः ब्रह्मभावं प्राप्नोति।

**उपसंहारः -**

एवं दृष्टे सति लिङ्गभङ्गमुक्तिशतकम् अद्वैतवेदान्तस्य अत्यन्तं महत्त्वपूर्णः प्रकरणग्रन्थः इति निष्कर्षः सिद्ध्यति। अस्मिन् ग्रन्थे महावाक्यार्थः सुबोधतया किन्तु गाम्भीर्येण प्रतिपादितः। विशेषतः तत्त्वमसि-महावाक्यस्य व्याख्या वेदान्ततत्त्वबोधाय अत्यन्तं उपकारिणी अस्ति।

उपनिषद्ब्रह्मेन्द्रयोगिनः करुणया विरचितं एतत् शतकं वेदान्त-सारग्रन्थरूपेण साधकानां मार्गदर्शकं भवति। महावाक्यार्थज्ञानमेव मोक्षस्य कारणम् इति सिद्धान्तः अत्र स्पष्टतया प्रतिपादितः।अतः लिङ्गभङ्गमुक्तिशतकस्य अध्ययनं वेदान्ततत्त्वावबोधाय अत्यन्त-मुपयोगि इति निश्चितम्।

**सन्दर्भग्रन्थसूची –**


१. **लिङ्गभङ्गमुक्तिशतकम्,**उपनिषद्ब्रह्मेन्द्रयोगी,स्तोत्रार्णवः, MGOMS, 1961|

२. श्रीमद्भगवद्गीता (शाङ्करभष्यसहिता), गीताप्रेश, गोरखपुर।

३. ब्रह्मसूत्रशाङ्करभाष्यम्, चौखम्बा विद्याभवन, वारणासी, १९९५।

४. छान्दग्योपनिषच्छाङ्करभाष्यसहिता, गीताप्रेस – गोरखपुर – सं २०६३।

५. ईशादि नौ उपनिषत्, गीताप्रेस – गोरखपुर – सं २०६३।

६. बृहदारण्यकोपनिषच्छाङ्करभाष्यसहिता,गीताप्रेस – गोरखपुर – सं २०६३।